# ७. वर्णानां संवादः ।

**(द्वितीयः घटकः)**

अ–आ–इ–ई–उ–ऊ– ऋ–ॠ–ऌ –ए–ऐ–ओ–औ : वयं सर्वे स्वराः। ऋ, ॠ, ऌ एते अपि स्वराः एव। ऋग्वेदः, ऋषिः आदीनां शब्दानाम् अग्रस्थाने ऋ इति स्वरः ।

ं : अहम् अनुस्वारः । अहं तु स्वराणाम् आश्रयेण एव तिष्ठामि। किं मम उच्चारणं कर्तुम् इच्छसि? तर्हि वद 'अम्' 'आम्' 'इम्' इति ।

ः : अहं विसर्गः । मम अपि उच्चारणं स्वरैः सह भवति । यदि माम् वक्तुम् इच्छसि तर्हि वद, 'अः' 'इः' 'उः' इति ।

क् ख् ग् घ् ङ् : वयं व्यञ्जनानि । वयं सर्वे सहोदराः। 'क' वर्गीयाः। अस्माकम् उच्चारणं कण्ठे भवति। अतः वयं कण्ठ्याः।

च् छ् ज् झ् ञ् : वयम् अपि सहोदराः। 'च' वर्गीयाः। अस्माकम् उच्चारणस्थानम् अस्ति तालुः। अतः वयं तालव्याः।

ट् ठ् ड् ढ् ण् : वयं खलु 'ट' वर्गीयाः । अस्माकम् उच्चारणस्थानं वर्तते मूर्धा । अतः वयं मूर्धन्याः ।

त् थ् द् ध् न् : वयं 'त' वर्गीयाः । वयं दन्त्याः। अस्माकम् उच्चारणे जिह्वा दन्तान् स्पृशति ।

प् फ् ब् भ् म् : वयं 'प' वर्गीयाः । अस्माकम् उच्चारणे ओष्ठौ सम्मिलतः । वयं खलु ओष्ठ्याः ।

य् : अहं तालव्यः।

र् : अहं मूर्धन्यः।

ल् : अहं दन्त्यः।

व् : अहं दन्तोष्ठ्यः।

श् : यदा मम उच्चारणं भवति तदा जिह्वायाः मध्यः तालुं किञ्चित् स्पृशति।यथा शशकः इति शब्दे। अतः अहं तालव्यः।

ष् : यदा मम उच्चारणं भवति तदा जिह्वायाः पृष्ठभागः मूर्धानं किञ्चित् स्पृशति। यथा षट्कोणः इति शब्दे । अतः अहं मूर्धन्यः।

स् : यदा मम उच्चारणं भवति तदा जिह्वायाः अग्रं दन्तान् किञ्चित् स्पृशति। यथा समीरः इति शब्दे। अतः अहं दन्त्यः।

ह् : अहं कण्ठ्यः।

क्ष् : (क् + ष्) एतयोः संयोगेन अहं भवामि। अतः अहं संयुक्ताक्षरम्।

ज्ञ् : (ज् + ञ्) एतयोः संयोगेन अहं भवामि। अतः अहमपि संयुक्ताक्षरम् ।

१. **तालिकां पूरयत ।**

| **ह्रस्वस्वरः** | **दीर्घस्वरः** |
|---|---|
| अ | ---- |
| --- | ई |
| ---- | ऊ |
| ऋ | ---- |

२. **अधोदत्तेषु वर्गेषु योग्यं वर्णं लिखत ।**

ञ्, म्, ङ्, ण्, न्

क् ख् ग् घ् .... ।

च् छ् ज् झ् .... ।

ट् ठ् ड् ढ् .... ।

त् थ् द् ध् .... ।

प् फ् ब् भ् .... ।

IBT3BJ

३. **अधोदत्तान् शब्दान् पश्यत, पठत, उच्चारणभेदम् अवगच्छत ।**

आशयः, विषयः, मशकः, मूषकः, सकलः, शकलः ।

४. **समूहेतरं वर्णं चिनुत ।**

१) क् ख् ग् ङ् ठ्

२) प् छ् फ् म् भ्

३) ई ए उ क्ष् ओ

४) न् ध् थ् च् द्

५. **शुद्धं शब्दं चिनुत ।**

१) रूचा - ऋचा २) पृथ्वी - प्रृथ्वी

३) ऋणम् - रुणम् ४) रूषिः- ऋषिः

५) विष्वासः- विश्वासः

६. **शब्दकोषे 'ज्ञानम्' तथा 'क्षमा' इति शब्दद्वयम् अन्विष्यत ।**

७. **अनुपठत-देवः, मालाः, कविः, नदीः, मतिः, भानुः, धेनूः, देवैः, नद्योः, मतेः, गौः ।**

**पठत-बोधत**



- पिनाक-फणि-बालेन्दु-भस्म-मन्दाकिनीयुता ।
  पवर्गरचितामूर्तिरपवर्गप्रदायिनी ।।

## वर्णमाला ।

**स्वराः (१३)**

१) ह्रस्व-स्वराः- अ इ उ ऋ लृ

२) दीर्घ-स्वराः- आ ई ऊ ॠ

३) संयुक्त -दीर्घस्वराः- ए (अ/आ + इ/ई)

ऐ (अ/आ + ए)

ओ (अ/आ + उ/ऊ)

औ (अ/आ + ओ/अ)

**स्वराश्रितौ (२)**- अनुस्वारः ( ं )

विसर्गः (:) च ।

**व्यञ्जनानि (३३)**

**१) वर्गीयव्यञ्जनानि**

| | | | | | |
|---|---|---|---|---|---|
| कु (क वर्गः) | क् | ख् | ग् | घ् | ङ् |
| चु (च वर्गः) | च् | छ् | ज् | झ् | ञ् |
| टु (ट वर्गः) | ट् | ठ् | ड् | ढ् | ण् |
| तु (त वर्गः) | त् | थ् | द् | ध | न् |
| पु (प वर्गः) | प् | फ् | ब् | भ् | म् |

**२) अवर्गीयव्यञ्जनानि**

(१) अन्तःस्थव्यञ्जनानि य् र् ल् व्

(२) उष्मव्यञ्जनानि श् ष् स् ह्

अभिजातसंस्कृते 'ळ्' नास्ति, केवलं वैदिकसूक्तेषु ।